श्री श्यामला स्तोत्रं

श्री श्यामला स्तोत्रं

जय मातर्विशालाक्षि जय संगीतमातृके |
जय मातंगि चंडालि गृहीतमधुपात्रके || 1 ||

नमस्तेऽस्तु महादेवि नमो भगवतीश्वरि |
नमस्तेऽस्तु जगन्मातर्जय शंकरवल्लभे || 2 ||

जय त्वं श्यामले देवि शुकश्यामे नमोऽस्तु ते |
महाश्यामे महारामे जय सर्वमनोहरे || 3 ||

जय नीलोत्पलप्रख्ये जय सर्ववशंकरि |
जय त्वजात्वसंस्तुत्ये लघुश्यामे नमोऽस्तु ते || 4 ||

नमो नमस्ते रक्ताक्षि जय त्वं मदशालिनि |
जय मातर्महालक्ष्मि वागीश्वरि नमोऽस्तु ते || 5 ||

नम इंद्रादिसंस्तुत्ये नमो ब्रह्मादिपूजिते |
नमो मरकतप्रख्ये शंखकुंडलशोभिते || 6 ||

जय त्वं जगदीशानि लोकमोहिनि ते नमः |
नमस्तेऽस्तु महाकृष्णे नमो विश्वेशवल्लभे || 7 ||

महेश्वरि नमस्तेऽस्तु नीलांबरसमन्विते |
नमः कळ्याणि कृष्णांगि नमस्ते परमेश्वरि || 8 ||

महादेवप्रियकरि नमः सर्ववशंकरि |
महासौभाग्यदे नृणां कदंबवनवासिनि || 9 ||

जय संगीतरसिके वीणाहस्ते नमोऽस्तु ते |
जनमोहिनि वंदे त्वां ब्रह्मविष्णुशिवात्मिके || 10 ||

वाग्वादिनि नमस्तुभ्यं सर्वविद्याप्रदे नमः |
नमस्ते कुलदेवेशि नमो नारीवशंकरि || 11 ||

अणिमादिगुणाधारे जय नीलाद्रिसन्निभे |
शंखपद्मादिसंयुक्ते सिद्धिदे त्वां भजाम्यहं || 12 ||

जय त्वं वरभूषांगि वरांगीं त्वां भजाम्यहं |
देवीं वंदे योगिवंद्ये जय लोकवशंकरि || 13 ||

सर्वालंकारसंयुक्ते नमस्तुभ्यं निधीश्वरि |
सर्गपालनसंहारहेतुभूते सनातनि || 14 ||

जय मातंगतनये जय नीलोत्पलप्रभे |
भजे शक्रादिवंद्ये त्वां जय त्वं भुवनेश्वरि || 15 ||

जय त्वं सर्वभक्तानां सकलाभीष्टदायिनि |
जय त्वं सर्वभद्रांगी भक्ताऽशुभविनाशिनि || 16 ||

महाविद्ये नमस्तुभ्यं सिद्धलक्ष्मि नमोऽस्तु ते |
ब्रह्मविष्णुशिवस्तुत्ये भक्तानां सर्वकामदे || 17 ||

मातंगीश्वरवंद्ये त्वां प्रसीद मम सर्वदा |
इत्येतच्छ्यामलास्तोत्रं सर्वकामसमृद्धिदं || 18 ||

शुद्धात्मा प्रजपेद्यस्तु नित्यमेकाग्रमानसः |
स लभेत्सकलान्कामान् वशीकुर्याज्जगत्त्रयं || 19 ||

शीघ्रं दासा भवंत्यस्य देवा योगीश्वरादयः |
रंभोर्वश्याद्यप्सरसामव्ययो मदनो भवेत् || 20 ||

नृपाश्च मर्त्याः सर्वेऽस्य सदा दासा भवंति हि |
लभेदष्टगुणैश्वर्यं दारिद्र्येण विमुच्यते || 21 ||

शंखादि निधयो द्वास्थाः सान्निध्यं पर्युपासते |
व्याचष्टे सर्वशास्त्राणि सर्वविद्यानिधिर्भवेत् || 22 ||

विमुक्तः सकलापद्भिः लभेत्संपत्तिमुत्तमां |
महापापोपपापौघैः सशीघ्रं मुच्यते नरः || 23 ||

जातिस्मरत्वमाप्नोति ब्रह्मज्ञानमनुत्तमं |
सदाशिवत्वमाप्नोति सोंते नात्र विचारणा || 24 ||

इति श्री श्यामला स्तोत्रं |